# sUryastutiH

# સૂર્યસ્તુતિઃ

## Document Information

Text title : sUryastutiH 1

File name : sUryastutiH.itx

Category : navagraha

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : BhaktivivekasAra

Latest update : November 18, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

sUryastutiH

# સૂર્યસ્તુતિઃ

ॐ નમ આદિત્યાય ॥

શ્રીભૈરવી -
ભગવન્દેવદેવેશ ભક્તાનુગ્રહકારક ।
દેહાસ્વાસ્થ્યં પરં દુઃખં ભવેદિતિ ન સંશયઃ ॥ ૧॥

રોગૈર્જીર્ણો યદા દેહસ્તદા કં દૈવતં શ્રયેત્ ।
યં સ્તુત્વા સ્વાસ્થ્યમાપ્નોતિ તદુપાસનમાદિશ ॥ ૨॥

શ્રીભૈરવઃ -
શ ૃણુ દેવિ પ્રવક્ષ્યામિ લોકાનુગ્રહકામ્યયા ।
રોગાજગરગ્રસ્તાનાં જન્તૂનાં પાપચેતસામ્ ॥ ૩॥

સ્મરણં ધારણં ચૈવ સૂર્યસ્યાર્ચનમેવ ચ ।
જ્વરાતિસારરોગાનાં નાશનં સ્મરણાદપિ ॥ ૪॥

કુષ્ઠવિચર્ચિકાદદ્રૂસન્નિપાતાદિ નાશનમ્ ।
સૂક્ષ્માતિસૂક્ષ્મં યત્તેજો તં દેવં શરણં શ્રયે ॥ ૫॥

વારયેદ્વિઘ્નરાશીંશ્ચ તમાંસિ ચ મુહુર્મુહુઃ ।
અન્તર્વાતૌઘધ્વંસી યસ્તં દેવં શરણં શ્રયે ॥ ૬॥

આકાશરૂપો વિશ્વાત્મા દેવઃપ્રમકટિતઃ પ્રભુઃ ।
દ્યોતનાત્રિષુ લોકેષુ તં દૈવં શરણં શ્રયે ॥ ૭॥

ધ્યાયનાત્સર્વલોકેષુ ચિન્તનાદપરાજિતમ્ ।
બુદ્ધ્યાત્સર્વસમાયુક્તં તં દેવં શરણં શ્રયે ॥ ૮॥

ધીપ્રેરકં તુ યત્તેજઃ સર્વવ્યાપકમવ્યયમ્ ।
બુદ્ધેઃ પારઙ્ગતં યત્તચ્છરણ્યં શરણં શ્રયે ॥ ૯॥

યત્તદાદિશતે બુદ્ધિર્ભર્ગઃ સદસદાત્મકમ્ ।

આર્તો ભક્ત્યા ચ પરમં શરણં તં વ્રજામ્યહમ્ ॥ ૧૦॥

રક્તપુષ્પસમાયુક્તં ગૃહીત્વોધન્તમર્ચયેત્ ।
પ્રતિશ્લોકમર્ઘપુષ્પં દત્ત્વા પ્રાગ્જલિકં સ્થિતમ્ ॥ ૧૧॥

સર્વે રોગાઃ પ્રણશ્યન્તિ લૂતા વિસ્ફોટકાદયઃ ।
ભગન્દરશિરોરોગમૂત્રરોગાશ્મરીયુતાઃ ॥ ૧૨॥

શ્વેતકુષ્ઠાધતીસારપાયુકુક્ષિસમુદ્ભવાઃ ।
ત્વગ્રોગા યે ક્ષુદ્રરોગા યે ત્વન્યે ચ મહેશ્વરિ ॥ ૧૩॥

તે સર્વે સમ્પ્રણશ્યન્તિ સ્તોત્રસ્યાસ્યાનુકીર્તનાત્ ।
આપન્ન આપદો મુચ્યેદ્બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૧૪॥

અપુત્રઃ પુત્રમાપ્નોતિ કન્યા વિન્દતિ સત્પતિમ્ ।
ભીતો ભયાત્પ્રમુચ્યેત ચેત્યાજ્ઞા પારમેશ્વરી ॥ ૧૫॥

ઇદં રહસ્યં પરમં નાખ્યેયં યસ્ય કસ્યચિત્ ।
ગુહ્યં ગુહ્યતમં લોકે વેદતન્ત્રસમુત્થિતમ્ ॥ ૧૬॥

સર્વતઃ સારમુદ્ધૃત્યતવસ્નેહાત્પ્રકાશિતમ્ ।
નાતઃ પરતરં સ્તોત્રં સૂર્યસ્યારાધનં પરમ્ ॥ ૧૭॥

અત્ર પૂજ્યો રવિર્દેવિ સ્તોત્રેણાનેન ભક્તિતઃ ।
સાયં પ્રાતર્નમસ્કૃત્ય નાન્નમદ્યાજ્જલં પિબેત્ ॥ ૧૮॥

વર્ષેણૈવ ભવેત્સિદ્ધિરિતિ સત્યં વરાનને ।
બદ્ધપદ્માસનો દેવઃ પ્રસન્નો ભક્તવત્સલઃ ॥ ૧૯॥

સપ્તાશ્વઃ સપ્તજિહ્વશ્ચ દ્વિભુજઃ પાતુ નો રવિઃ ।
અકૃતાનિ ચ પુષ્પાણિ સલિલારુણચન્દનૈઃ ॥ ૨૦॥

અર્ઘ્યં દત્ત્વા પ્રયત્નેન સૂર્યનામાનિ કીર્તયેત્ ।
નમસ્તે વિશ્વરૂપાય નમસ્તે બ્રહ્મરૂપિણે ॥ ૨૧॥

સહસ્રરશ્મયે નિત્યં નમસ્તે સર્વતેજસે ।
નમસ્તે રુદ્રવપુષે નમસ્તે ભક્તવત્સલ ॥ ૨૨॥

પદ્મનામ નમસ્તેઽસ્તુ કુણ્ડલાઙ્ગદશોભિત ।
નમસ્તે સર્વલોકેશ જગત્સર્વં પ્રબોધસે ॥ ૨૩॥

સુકૃતં દુષ્કૃતં ચૈવ સર્વં પશ્યસિ સર્વગ ।
સત્યદેવ નમસ્તેઽસ્તુ પ્રસીદ મમ ભાસ્કર ॥ ૨૪॥

દિવાકર નમસ્તેઽસ્તુ પ્રભાકર નમોઽસ્તુ તે ।
આશ્રમસ્થસ્તતઃ પૂજાપ્રતિમાં ચાપિ પૂજયેત્ ॥ ૨૫॥

ઉદયંસ્તુ મહાભાનુસ્તેજસા ચાભયઙ્કરઃ ।
સહસ્રરશ્મિદીપ્તશ્ચ હ્યાદિત્યઃ પ્રીયતાં મમ ॥ ૨૬॥

ઇતિ સૂર્યસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

---

*sUryastutiH*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*